# Tripurasundari PratahsmaraNam

# ત્રિપુરસુન્દરીપ્રાતઃસ્મરણમ્

## Document Information

Text title : tripurasundarIprAtaHsmaraNam

File name : tripurasundarIprAtaHsmaraNam.itx

Category : suprabhAta, devii, dashamahAvidyA, devI, panchadashI

Location : doc_devii

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Latest update : December 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 27, 2022

*sanskritdocuments.org*

# ત્રિપુરસુન્દરીપ્રાતઃસ્મરણમ્

શ્રીગણેશાય નમઃ ।
ૐ ક એ ઈ લ હ્રીં હ સ ક હ લ હ્રીં સ ક લ હ્રીં શ્રીં ।
કસ્તૂરિકાકૃતમનોજ્ઞલલામભાસ્વ-
દર્ધેન્દુમુગ્ધનિટિલાઞ્ચલનીલકેશીમ્ ।
પ્રાલમ્બમાનનવમૌક્તિકહારભૂષાં
પ્રાતઃ સ્મરામિ લલિતાં કમલાયતાક્ષીમ્ ॥ ૧॥

એણાઙ્કચૂડસમુપાર્જિતપુણ્યરાશિ-
મુત્તપ્તહેમતનુકાન્તિઝરીપરીતામ્ ।
એકાગ્રચિત્તમુનિમાનસરાજહંસીં
પ્રાતઃ સ્મરામિ લલિતાપરમેશ્વરીં તામ્ ॥ ૨॥

ઈષદ્વિકાસિનયનાન્તનિરીક્ષણેન
સામ્રાજ્યદાનચતુરાં ચતુરાનનેડ્યામ્ ।
ઈશાઙ્કવાસરસિકાં રસસિદ્ધિદાત્રીં
પ્રાતઃ સ્મરામિ મનસા લલિતાધિનાથામ્ ॥ ૩॥

લક્ષ્મીશપદ્મભવનાદિપદૈશ્ચતુર્ભિઃ
સંશોભિતે ચ ફલકેન સદાશિવેન ।
મઞ્ચે વિતાનસહિતે સસુખં નિષણ્ણાં
પ્રાતઃ સ્મરામિ મનસા લલિતાધિનાથામ્ ॥ ૪॥

હ્રીંકારમન્ત્રજપતર્પણહોમતુષ્ટાં
હ્રીંકારમન્ત્રજલજાતસુરાજહંસીમ્ ।
હ્રીંકારહેમનવપઞ્જરસારિકાં તાં
પ્રાતઃ સ્મરામિ મનસા લલિતાધિનાથામ્ ॥ ૫॥

હલ્લીસલાસ્યમૃદુગીતિરસં પિબન્તી-
માકૂણિતાક્ષમનવદ્યગુણામ્બુરાશિમ્ ।

સુપ્તોત્થિતાં શ્રુતિમનોહરકીરવાગ્ભિઃ
પ્રાતઃ સ્મરામિ મનસા લલિતાધિનાથામ્ ॥ ૬॥

સચ્ચિન્મયીં સકલલોકહિતૈષિણી ચ
સમ્પત્કરીહયમુખીમુખદેવતેડ્યામ્ ।
સર્વાનવદ્યસુકુમારશરીરરમ્યાં
પ્રાતઃ સ્મરામિ મનસા લલિતાધિનાથામ્ ॥ ૭॥

કન્યાભિરર્ધશશિમુગ્ધકિરીટભાસ્વ-
ચ્ચૂડાભિરઙ્ગતહૃદ્યવિપઞ્ચિકાભિઃ ।
સંસ્તૂયમાનચરિતાં સરસીરુહાક્ષીં
પ્રાતઃ સ્મરામિ મનસા લલિતાધિનાથામ્ ॥ ૮॥

હત્વાઽસુરેન્દ્રમતિમાત્રબલાવલિપ્ત-
ભણ્ડાસુરં સમરચણ્ડમઘોરસૈન્યમ્ ।
સંરક્ષિતાર્તજનતાં તપનેન્દુનેત્રાં
પ્રાતઃ સ્મરામિ મનસા લલિતાધિનાથામ્ ॥ ૯॥

લજ્જાવનમ્રરમણીયમુખેન્દુબિમ્બાં
લાક્ષારુણાઙ્ઘ્રિસરસીરુહશોભમાનામ્ ।
રોલમ્બજાલસમનીલસુકુન્તલાઢ્યાં
પ્રાતઃ સ્મરામિ મનસા લલિતાધિનાથામ્ ॥ ૧૦॥

હ્રીંકારિણી હિમમહીધરપુણ્યરાશિં
હ્રીંકારમન્ત્રમહનીયમનોજ્ઞરૂપામ્ ।
હ્રીંકારગર્ભમનુસાધકસિદ્ધિદાત્રીં
પ્રાતઃ સ્મરામિ મનસા લલિતાધિનાથામ્ ॥ ૧૧॥

સઞ્જાતજન્મમરણાદિભયેન દેવીં
સમ્ફુલ્લપદ્મવિલયાં શરદિન્દુશુભ્રામ્ ।
અર્ધેન્દુચૂડવનિતામણિમાદિવન્દ્યાં
પ્રાતઃ સ્મરામિ મનસા લલિતાધિનાથામ્ ॥ ૧૨॥

કલ્યાણશૈલશિખરેષુ વિહારશીલાં
કામેશ્વરાઙ્કનિલયાં કમનીયરૂપામ્ ।
કાદ્યર્ણમન્ત્રમહનીયમહાનુભાવાં
પ્રાતઃ સ્મરામિ મનસા લલિતાધિનાથામ્ ॥ ૧૩॥

લમ્બોદરસ્ય જનનીં તનુરોમરાજીં
    બિમ્બાધરાં ચ શરદિન્દુમુખીં મૃડાનીમ્ ।
લાવણ્યપૂર્ણજલધિં જલજાતહસ્તાં
    પ્રાતઃ સ્મરામિ મનસા લલીતાધિનાથામ્ ॥ ૧૪॥

હ્રીંકારપૂર્ણનિગમૈઃ પ્રતિપાદ્યમાનાં
    હ્રીંકારપદ્મનિલયાં હતદાનવેન્દ્રામ્ ।
હ્રીંકારગર્ભમનુરાજનિષેવ્યમાણાં
    પ્રાતઃ સ્મરામિ મનસા લલિતાધિનાથામ્ ॥ ૧૫॥

શ્રીચક્રરાજનિલયાં શ્રિતકામધેનું
    શ્રીકામરાજજનનીં શિવભાગધેયામ્ ।
શ્રીમદ્ગુહસ્ય કુલ્યમઙ્ગલદેવતાં તાં
    પ્રાતઃ સ્મરામિ મનસા લલિતાધિનાથામ્ ॥ ૧૬॥

ઇતિ શ્રીત્રિપુરસુન્દરીપ્રાતઃસ્મરણં સમાપ્તમ્ ॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

*Tripurasundari PratahsmaraNam*

pdf was typeset on December 27, 2022

Please send corrections to *sanskrit@cheerful.com*